— तृंह्यमाणः, — तरीतृह्यमाणः ;
— तृंहयिष्यमाणः, — तरीतृहिष्यमाणः ;
[1]प्रतृट्-प्रतृड्-प्रतृहौ-प्रतृहः ; — —
[2]तृढम्-तृढः-तृढवान्, तृंहितः, तितृंहिषितः-तितृक्षितः, तरीतृहितः-तवान् ;
तृंहः, तृंहः, तितृंहिषुः-तितृक्षुः, तरीतृंहः ;
तृंहितव्यम्-तृण्ढव्यम्, तृंहयितव्यम्, तितृंहिषितव्यम्-तितृक्षितव्यम्, तरीतृहितव्यम् ;
तृंहणीयम्, तृंहणीयम्, तितृंहिषणीयम्-तितृक्षणीयम्, तरीतृहणीयम् ;
तृंह्यम्, तृंह्यम्, तितृंहिष्यम्-तितृक्ष्यम्, तरीतृह्यम् ;
ईषत्तृंहः-दुस्तृंहः-सुतृंहः ; — —
तृंह्यमाणः, तृंह्यमाणः, तितृंहिष्यमाणः-तितृक्ष्यमाणः, तरीतृह्यमाणः ;
[A]तृंहः, तृंहः, तितृंहिषः-तितृक्षः, तरीतृहः ;
तृंहितुम्-तृण्ढुम्, तृंहयितुम्, तितृंहिषितुम्-तितृक्षितुम्, तरीतृहितुम् ;
[3]तृंहा, तृंहणा, तितृंहिषा-तितृक्षा, तरीतृहा ;
तृंहणम्, तृंहणम्, तितृंहिषणम्-तितृक्षणम्, तरीतृहणम् ;
[4]तृंहित्वा-तृढ्वा, तृंहयित्वा, तितृंहिषित्वा-तितृक्षित्वा, तरीतृहित्वा ;
प्रतृंह्य, प्रतृंह्य, प्रतितृंहिष्य-प्रतितृक्ष्य, प्रतरीतृह्य ;
तृंहम् २, तृंहित्वा २-तृढ्वा २, } तृंहम् २, तृंहयित्वा २, } तितृंहिषम् २-तितृक्षम् २, तितृंहिषित्वा २-तितृक्षित्वा २, } तरीतृहम् २ ; तरीतृहित्वा २. }

(770) " **तृप प्रीणने** " (IV-दिवादिः-1195. सक. वेट्. पर.) रधादिः। **प्रीणनम्**=तृप्तिः, तर्पणं च। आद्येऽकर्मकः, द्वितीये—सकर्मकः।

---

1. क्विपि, उपधानकारलोपे, ढत्वे, चर्त्वजश्त्वयोश्च रूपम्।
2. निष्ठायामुपधानकारलोपे, ढत्वधत्वष्टुत्वढलोपाः।
3. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः।
4. इट्पक्षे, 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधादुपधानकारलोपो न। इडभावपक्षे, ढत्वधत्वष्टुत्वढलोपाः।

A. 'कंसः स्थितो यत्र ततर्ह लोकं स्तृढामरः तृंहकरान भीच्छन् ॥' धा. का. 2. 77.